# Master of Arts Examination, 2023

(2nd Year, 3rd Semester)

## SANSKRIT

## Course – XIII / E

## [ A General Survey of Indian Epigraphy ]

Time : Two hours | Full Marks : 30

*The figures in the margin indicate full marks.*

**क–विभागः**

१। सुरगिरा देवनागर्या लिप्या **त्रयः** प्रश्नाः समाधेयाः। 1×3=3

क) जेम्स् प्रिन्सेप्–महोदयः कुत्र आदिब्राह्मीलिपेः पाठोद्धारस्य प्रथमं सूत्रम् उपलब्धवान्?

ख) ब्राह्मीलिपेः द्राविडोद्भवं प्रस्तुवतां विदुषां मध्ये द्वयोर्नामनी इष्येते।

ग) अशोकाभिलेखे उल्लिखितस्य ठ–वर्णस्य इ–वर्णस्य च रूपद्वयं वाक्यमात्रेण वर्ण्यताम्।

घ) गौडी लिपिः ब्युलर्–महोदयेन केन नाम्नाभिहिता?

२। अधोलिखितेषु **त्रयः** प्रश्नाः समाधेयाः। 4×3=12

क) छ–ण–श–वर्णानां प्राचीनब्राह्मीतो मध्यब्राहम्याम् उत्तरब्राहम्यां सिद्धमातृकायां गौड्यां च यानि रूपाणि विवर्तनक्रमेण लभ्यन्ते तानि प्रथमतो वाक्यैः ततश्च रेखाभिः वर्ण्यन्ताम्।

ख) खरोष्टीलिपेः पाठोद्धारवृत्तान्तः समासत उच्यताम्।

ग) ब्राह्मीलिपेः वैदेशिकोद्भवमाश्रित्य यानि तत्त्वानि प्रचलन्ति तानि समासत उपस्थापनीयानि।

[ Turn over

घ) अशोकाभिलेखेषु उपलब्धायाम् आदिब्राह्मीलिप्यां कति स्वरवर्णाः कति च व्यञ्जनवर्णाः सन्ति? तत्र वर्णविशेषाणाम् अनुपलब्धेः हेतवः प्रस्तूयन्ताम्। ब्राह्मीलिपिः पूर्णत अक्षरात्मिका न वा? 1.5+1.5+1

**ख-विभागः**

३। सुरगिरा देवनागर्या लिप्या **त्रयः** प्रश्नाः समाधेयाः। 1×3=3

क) अशोकाभिलेखानां जुनागढसंस्करणे कस्याः प्राकृतभाषाया उपयोगो दृश्यते?

ख) प्राचीनभारतीयाभिलेखेभ्यः कति ऋतवो ज्ञायन्ते के च?

ग) कु-वर्ष-लाभ-शब्दैः कासां संख्यानां बोधो भवति?

घ) यशोधर्मणः मान्दासोरशिलास्तम्भलेखस्य कविः कः?

४. **घ-चिह्नितः** प्रश्नोऽवश्यमेव समाधेयः। अन्येषु **द्वितयं** समाधेयम्। 4×3=12

क) अधोलिखितं संदर्भं सावधानं पठित्वा तत्र अशोकप्राकृतस्य को भेद उपयुक्त इति सयुक्तिकं विचार्यताम्।

देवनप्रिये प्रियद्रशि रज एवं अह। जने उचवुचं मगलं करोति। अबधसि अवहसि विवहसि प्रजोपदये प्रवसस्पि एतये अञये च एदिशवे जने बहु मंगलं करोति। अत्र तु अबकजनिक बहु च बहुविध च खुद च निरथ्रिय च मगलं करोति। से कटविये चेव खो मगले। अपफले चु खो एषे। इयं चु खो महफले ये ध्रममगले। अत्र इयं दसभटकसि सम्यपटिपति गुरुन अपचिति प्रणन सयमे श्रमण-ब्रमणन दने।

[संस्कृतच्छाया - देवानांप्रियः प्रियदर्शी राजा एवम् आह। जनः उच्चावचं मङ्गलं करोति। आबाधे आवाहे विवाहे प्रजोत्पादे



प्रवासे एतस्मिन् अन्यस्मिन् च एतादृशे जनः बहु मङ्गलं करोति। अत्र तु अम्बिकाजनिकं बहु च बहुविधं च क्षुद्रं च निरर्थकं च मङ्गलं करोति। तत् कर्तव्यं च एव खलु मङ्गलम्। अल्पफलं च तु खलु एतत्। इदं च तु खलु महाफलं यत् धर्ममङ्गलम्। अत्र इदं दासभृतकेषु सम्यक्प्रतिपत्तिः गुरूणाम् अपचितिः प्राणानां संयमः श्रमणब्राह्मणेभ्यः दानम्। ]

ख) विजयसेनस्य देवपाडाप्रशस्तेः कविः कः? तस्याः प्रशस्तेः काव्यगुणा आलोच्यन्ताम्। .5+3.5

ग) गुप्ताब्दमाश्रित्य संक्षिप्तो निबन्धो विरचनीयः।

घ) अधोलिखितानां संकेतानाम् **देवनागर्या अङ्केन** परिणमनं कार्यम्।

- वसुवेदर्तुशुभ्रांशु ....।
- शिखिहुतवहकालक्ष्मामिते ....।
- कलारसरसाप्रमाणे ....।
- शाके रामहराक्षिशैलपृथिवीमाने।
- श्रुत्यृषीषुसितांशुप्रमे शाकहायने।
- भूम्यृतुगुणरजनीनाथाङ्के शाकेऽब्दे।
- कालरसावसुरसाङ्के विक्रमाब्दे।
- शाके रामतनूनपान्मुनिधरामाने।